टिप्पणी—पङ्के रोहति = पङ्करुहः (कृदन्त क (अ) प्रत्यय)। पङ्करुहस्येव आननम् यस्या॰ सा पङ्करुहानना = कमलवदना। इन्दीवर = नीलकमल (नयन)। ताडितुं मनः यस्याः सा ताडितुमनाः। 'त काममनसोरपि' इस सूत्र से मकार का लोप। मोचयित्वा = √मोचि + इ + त्वा–ण्यन्त मुच् धातु से त्वा प्रत्यय ॥ ३ ॥

विदूषकः—[स्वगतम्] भोदु एव्वं दाव। [प्रकाशम्] भो वअस्स! अज्ज मए वि सिविणं दिट्ठं। (भवतु एवं तावत् (प्रकाशम्) भो वयस्य ! अद्य मयाऽपि स्वप्नो दृष्टः ।)

राजा—[सप्रत्याशम्] ता कहिज्जदु कीरिसं तं सिविणअं ? (तत् कथ्यतां कीदृशः स स्वप्नः ?)

विदूषकः—अज्ज जाणे, सिविणए सुरसरिआसोत्ते सुत्तोम्हि, ता हरसिरसोवरि दिण्णलीलाचलणाए गंगाए पक्खालिदोम्हि तोएण। (अद्य जाने, स्वप्ने सुरसरितस्रोतसि सुप्तोऽस्मि; तद्धरशिरस उपरि दत्तलीलाचरणाया गङ्गायाः प्रक्षालितोऽस्मि तोयेन ।)

राजा—तदो तदो ? (ततस्ततः ?)

विदूषकः—तदो सरअसमअवरिसिणा जलहरेण जहिच्छं पीदोम्हि। (ततः शरत्समयवर्षिणा जलधरेण यथेच्छं[1] पीतोऽस्मि ।)

राजा—अच्छरिअं !! अच्छरिअं !! तदो तदो ? (आश्चर्यमाश्चर्यम् !! ततस्ततः ?)

विदूषक—(अपने मनमें) होगा ऐसा। (प्रकाशमें) मित्र ! आज मैंने भी स्वप्न देखा है।

राजा—(प्रत्याशा के साथ) बताओ तो तुम्हारा स्वप्न कैसा है ?

विदूषक—आज ऐसा लगता है मानो स्वप्न में गंगा के प्रवाह में सो गया हूँ और फिर शिवजी के सिर पर लीला में चरण रखने वाली गंगा के जल से जैसे मुझे स्नान करा दिया गया है।

राजा—फिर, फिर ?

विदूषक—फिर शरत् ऋतु में वरसने वाले बादलों में खूब भीगा।

राजा—आश्चर्य है ! आश्चर्य है ! फिर क्या हुआ ?

---

१. इच्छामनतिक्रम्य यथेच्छम् (अव्ययीभाव) इच्छा के अनुसार।

विदूषक:—तदो सत्तिणक्खत्तगदे भअवइ मत्तंडे तम्मवण्णी-णईसंगदं समुद्दं गदो महामेहो; जाणे, अहं बि मेहगब्भट्ठिदो गच्छेमि। (ततः स्वातीनक्षत्रगते भगवति मार्त्तण्डे ताम्रपर्णीनदीसङ्गतं समुद्रं गतो महामेघः; जाने, अहमपि मेघगर्भस्थितो गच्छामि।)

राजा—तदो तदो ? (ततस्ततः ?)

विदूषक:—तदो सो तहिं थूलजलबिंदूहिं बरिसिदुं पउत्तो। अहं अ रअणाअरसुत्तीहिं मुत्ताणामहेआहिं संपुडं समुग्घाडिअ जलबिंदूहिं समं पीदोम्हि; ताणं अ दसमासप्पमाणं मोत्ताहलं भबिअ गब्भे ट्ठिदो। (ततोऽसौ तत्र स्थूलजलबिन्दुभिर्बर्षितुं प्रवृत्तः, अहञ्च रत्नाकरशुक्तिभिर्मुक्तानामधेयाभिः सम्पुट समुद्घाट्य जल-बिन्दुभिः समं पीतोऽस्मि, तासाञ्च दशमाषप्रमाणं मुक्ताफलं भूत्वा गर्भे स्थितः।)

राजा—तदो तदो ? (ततस्ततः ?)

विदूषक—तब भगवान् सूर्य के स्वाती नक्षत्र में पहुँचने पर महामेघ ताम्रपर्णी नदी से मिले हुये समुद्र पर गया, याद पड़ता है जैसे मैं भी मेघ के गर्भ में चला जा रहा था।

राजा—फिर, फिर ?

विदूषक—फिर यह वहाँ पर बड़ी बड़ी बूँदों के साथ बरसने लगा, मुझे भी समुद्र में रहने वाली मुक्ता नाम की सीपियाँ आवरण तोड़ कर जल की बूँदों के साथ पी गई। दस माष (पचास घुंघची) के बराबर आकार का मोती बनकर मैं उनके गर्भ में रहा।

राजा—फिर, फिर ?

टिप्पणी—सम्पुट = आवरण। समुद्घाट्य = निर्भिद्य-तोड कर। समम्-साथ। माष = पाच घुघुची के बराबर-'दशार्धगुञ्जं प्रवदन्ति माषम्।' (लीलावती)।

विदूषकः—

तदो चउस्सट्ठिसु सुत्तिसु ट्ठिदो
घणंबुबिंदूजिदवंसरोअणो।
सुवत्तुलं णित्तलमच्छमुज्जलं
कमेण पत्तो णवमुत्तिअत्तणं ॥ ४ ॥

(ततश्चतुःषष्टिषु शुक्तिषु स्थितो
घनाम्बुबिन्दुर्जितवंशरोचनः।
सुवर्त्तुलं निस्तलमच्छमुज्ज्वलं
क्रमेण प्राप्तो नवमौक्तिकत्वम् ॥ ४ ॥)

राजा—तदो तदो ? (ततस्ततः ?)

विदूषकः—तदो सोहमत्ताणं ताणं सुत्तीणं गब्भगअं मुत्ताहलत्तणेण मण्णेमि। (ततः सोऽहमात्मानं तासां शुक्तीनां गर्भगतं मुक्ताफलत्वेन मन्ये।)

अन्वयः—ततः चतुःषष्टिषु शुक्तिषु स्थितः घनाम्बुबिन्दुः जितवंशरोचनः (अहम्) सुवर्तुलम् निस्तलम् अच्छम् उज्ज्वलम् नवमौक्तिकत्वम् क्रमेण प्राप्तः।

सरलार्थः—ततः चतुःषष्टिषु शुक्तिषु स्थितः घनाम्बुबिन्दुसमानः वंशरोचनादपि उत्कृष्टः अहम् सुवर्तुल गोलाकार निस्तलम् कान्तिमत् उज्ज्वलं नवमौक्तिकत्वं क्रमेण प्राप्तः नवमौक्तिकोऽभूवम् ॥ ४ ॥

विदूषक—**फिर ६४ सीपियों के अन्दर स्थित जल की बूँद के समान और वंशलोचन से भी उत्कृष्ट मैं गोल और चमकीले नये मोती में धीरे धीरे बदल गया ॥४॥**

राजा—**फिर, फिर ?**

विदूषक—**तब उन शुक्तियों के गर्भ में पड़ा हुआ मैं अपने को मोती समझने लगा।**

टिप्पणी—चतुःषष्टि=चौसठ। जित वंशरोचन येन सः जितवंशरोचनः=तिरस्कृत वंशरोचनः। सुवर्तुलम्=खूब गोल ॥ ४ ॥

राजा—**तदो तदो ?** (ततस्ततः ?)

विदूषकः—**तदो परिणदे काले समुद्दाहिंतो कड्ढिदाओ ताओ सुत्तीओ फाडिदाओ अ । अहं चतुस्सट्ठिमुत्ताहलत्तणं गदो ट्ठिदो । किणिदो अ एक्केण सेट्ठिणा सुवण्णलक्खं देइअ ।** (ततः परिणते काले समुद्रात् कर्षितास्ताः शुक्तयः विदारिताश्च । अहं चतुःषष्टिमुक्ताफलत्वं गतः स्थितः । क्रीतश्चैकेन श्रेष्ठिना सुवर्णलक्षं दत्त्वा ।)

राजा—**अहो ! बिचित्तदा सिबिणअस्स । तदो तदो ?** (अहो ! विचित्रता स्वप्नस्य । ततस्ततः ?)

विदूषकः—**तदो तेण आणिअ बेधआरएहिं बेधाबिआइं मोत्तिआइं । मम बि ईसीसि बेअणा समुप्पण्णा ।** (ततस्तेनानीय वेधकारै[1]र्वेधितानि मौक्तिकानि । ममापीषद्वेदना समुत्पन्ना ।)

राजा—**तदो तदो ?** (ततस्ततः ?)

विदूषकः—**तदो** (ततः)—

राजा—**फिर, फिर ?**

विदूषक—**फिर समय बीतने पर वे सीपियाँ समुद्र से निकाल ली गई और फोड़ी गईं। मैं चौसठ मोतियों के रूप में था। एक सेठ ने सुवर्णलक्ष देकर मुझे मोल ले लिया।**

राजा—**अरे। बड़ा विचित्र स्वप्न है। फिर क्या हुआ ?**

विदूषक—**तब उसने वेधकारों को बुलाकर मोतियों में छेद कराये। मुझे भी कुछ वेदना हुई।**

राजा—**फिर, फिर ?**

विदूषक—**तब फिर:—**

टिप्पणी—कर्षिता.=निकाला। विदारिताः=फोड़ा गया।

१. वेधकार=छेद करने वाला।

तेणावि मुत्ताहलमंडलेण एक्केक्कदाए दसमासिएण।
एक्कावली गंठिक्कमेण गुत्था जा संठिदा कोटिसुवण्णमुल्ला ॥५॥
(तेनापि मुक्ताफलमण्डलेनैकैकतया दशमाषिकेण।
एकावली[1]ग्रन्थिक्रमेण गुम्फिता सा संस्थिता कोटिसुवर्णमूल्या ॥५॥)

राजा—तदो तदो ?

विदूषकः—तदो तं करंडिआइ कदुअ साअरदत्तो णाम वाणिओ गदो पंचालाधिपस्स सिरिवज्जाउहस्स णअरं कण्णउज्जं णाम; तहिं च सा विक्किणीदा कोडीए सुवण्णस्स। (ततस्तां करण्डिकायां[2] कृत्वा सागरदत्तो नाम वणिक् गतः पाञ्चालाधिपस्य श्रीवज्रायुधस्य नगरं कान्यकुब्जं नाम। तत्र च सा विक्रीता[3] कोट्या सुवर्णस्य।)

राजा—तदो तदो ? (ततस्ततः ?)

विदूषकः—तदो अ (ततश्च)—

सरलार्थः—तेन श्रेष्ठिना अपि मुक्ताफलमण्डलेन एकैकतया प्रत्येकशः दशमाषिकेण दशमाषमितेन एकावली एकसरो हारः ग्रन्थिक्रमेण ग्रन्थानुसारेण गुम्फितः। तस्य च कोटिसुवर्णमासीत् ॥ ५ ॥

उस सेठ ने भी दस दस माष के बराबर (पचास पचास घुंघची) मोतियों से एक एक लड़ वाला हार बनवाया, उसका मूल्य कोटि सुवर्ण था ॥ ५ ॥

राजा—**फिर, फिर ?**

विदूषक—**फिर उस हार को करण्डिका मे रखकर सागरदत्त नाम का बनिया पाञ्चाल देश के राजा श्रीवज्रायुध के कान्यकुब्ज नगर में गया। उसने वहाँ उस हार को सुवर्ण की एक कोटि में बेच दिया।**

राजा—**फिर, फिर ?**

विदूषक—**फिर:—**

---

१. एकावली = एक लड वाला हार।
२. करण्डिका = एक पात्र का नाम। ३. विक्रीता = बेच दी।

दट्ठूण थोरत्थणतुंगिमाणं एक्कावलीए तह चंगिमाणं ।
सा तेण दिण्णा दइदाइ कंठे रज्जंति छेआ समसंगमम्मि ॥ ६ ॥

(दृष्ट्वा स्थूलस्तनतुङ्गिमानमेकावल्यास्तथा चङ्गिमानम् ।
सा तेन दत्ता दयितायाः कण्ठे रज्यन्ति च्छेकाः समसङ्गमे ॥६॥)

अवि अ (अपि च)—

णहबहलिदजोण्हाणिब्भरे रत्तिमज्झे
कुसुमसरपहारत्तासंमीलिदाणं ।
णिहुवणपरिरंभे णिब्भरुत्तुंगपीण-
त्थणकलसणिवेसा पीडिदोहं विबुद्धो ॥ ७ ॥

(नभोबहलितज्योत्स्नानिर्भरे रात्रिमध्ये

अन्वयः—तेन स्थूलस्तनतुगिमानम्, तथा एकावल्याः चङ्गिमानम् दृष्ट्वा सा दयितायाः कण्ठे दत्ता । छेकाः समसंगमे रज्यन्ति ।

व्याख्या—तेन पाञ्चालाधिपेन वज्रायुधेन स्वदयितायाः स्थूलयोः स्तनयोः पयोधरयो तुगिमानम् पीनत्वम्, तथा एकावल्याः हारस्य चङ्गिमानं सौन्दर्यं च दृष्ट्वा सा एकावली दयितायाः कण्ठे दत्ता । छेकाः विदग्धा समसंगमे रज्यन्ति प्रसनाः भवन्ति । स्तनयोरेकावलीसंगमः आनन्ददायक इत्यर्थः ॥ ६ ॥

व्याख्या—यदा नभसि आकाशे ज्योत्स्नानां चन्द्रिकाणां निर्भरः अतिशय

पाञ्चाल देश के राजा वज्रायुध ने अपनी रानी के उठे हुये स्तनों के उभार तथा एकावली हार के सौन्दर्य को देखकर वह हार अपनी रानी के गले में पहिना दिया। विद्वान् बराबर का बराबर वाले के साथ संगम देख कर प्रसन्न होते हैं ॥ ६ ॥

और भी:—

आकाश में जब खूब चांदनी खिली हुई थी, ऐसी मध्यरात्रि में कामदेव के

टिप्पणी—तुंगस्य भावः = तुगिमा = ऊँचाई–तुग शब्द से भावार्थक इमनिच् प्रत्यय । चंगिमा = सौन्दर्यं । रज्यन्ति = प्रसन्न होते हैं ॥ ६ ॥

टिप्पणी—ज्योत्स्नाना निर्भरः = ज्योत्स्नानिर्भरः–नभसि बहलित ज्योत्स्नानिर्भरः

कुसुमशरप्रहारत्राससम्मिलितयोः ।
निधुवनपरिरम्भे निर्भरोत्तुङ्गपीन-
स्तनकलशनिवेशात्पीडितोऽहं विबुद्धः ॥ ७ ॥)

राजा—[किञ्चिद्विहस्य विचिन्त्य च]—

सिविणअमिअं असचं तं दिट्ठं मेणुसंधमाणस्स ।
पडिसिविणएण तस्स वि णिआरणं तुह अहिप्पाओ ॥८॥

(स्वप्नमिममसत्यं तत् दृष्टं ममानुसन्दधतः ।
प्रतिस्वप्नेन तस्यापि निवारणं तवाभिप्रायः ॥ ८ ॥)

प्रसृतः अभवत् तादृशे रात्रिमध्ये कुसुमशरस्य कामस्य प्रहारात् त्रासेन भयेन च सम्मिलितयोः संगतयो तयोः राजदम्पत्योः निधुवनपरिरम्भे संभोगकालीनालिङ्गने निर्भरोत्तुंगयोः नितरामुन्नतयोः पीनयो स्थूलयोः स्तनकलशयोः निवेशात् सम्पातात् पीडितः अहं विबुद्धः जागरितवान् । यदा रात्रौ राजा स्वदयितां रन्तुमारब्धः, संयोगकाले च तां प्रगाढमालिङ्गितवान् तदा तस्याः स्तनयोः सम्पातादहं पीडितोऽभवम् । अतः सपदि एव जागरितः ॥ ७ ॥

अन्वयः—तत् इमम् असत्यम् दृष्टं स्वप्नम् अनुसन्दधतः मम प्रतिस्वप्नेन तस्य अपि निवारणम् तव अभिप्रायः अस्तीति शेषः ।

सरलार्थः—मया असत्यमेव स्वप्नो दृष्टः, स्वप्रतिस्वप्न कथनेन त्वया तस्य निवारणं कृतमित्यर्थः ॥ ८ ॥

प्रहार और डर से मिले हुये उन राजदम्पती की जब सुरतक्रीडा प्रारम्भ हुई तब आलिंगन में घट के समान खूब उठे हुये स्तनों के बैठ जाने से मुझ पर दबाव पड़ा और मैं जाग गया ॥ ७ ॥

राजा—**(कुछ हंसकर और विचार कर):—**

मैं इस झूठे स्वप्न का ध्यान कर रहा था । अपने प्रति स्वप्न को सुना कर तूने मुझे स्वप्न के याद करने से भी रोक दिया ॥ ८ ॥

यस्मिन् तस्मिन् नभोबहलितज्योत्स्नानिर्भरे =आकाशप्रसृतज्योत्स्नातिशये । कुसुमशरस्य प्रहारात् त्रासेन सम्मिलितयोः =कामदेवप्रहारभयसंगतयोः । निधुवन सम्भोगः तस्मिन्

विदूषक:—**भट्टो ठक्कुरो, क्खुहाकिलंतो बम्हणो, अविणीदहिअआ बालरंडा, बिरहिदो अ माणुसो मणोरहमोदएहिं अत्ताणं बिडंबेदि। अबि अ बअस्स! पुच्छेमि, कस्स उण एसो प्पहाओ?** (भ्रष्टो राजा, क्षुधाक्रान्तो ब्राह्मणः, अविनीतहृदया बालरण्डा, विरहितश्च मानुषो मनोरथमोदकैरात्मानं विडम्बयति। अपि च वयस्य! पृच्छामि, कस्य पुनरेष प्रभावः?)

राजा—**प्पेमस्स।** (प्रेम्णः।)

विदूषक:—**भो! देवीगदे प्पणअप्परूढे बि प्पेमे किं त्ति कप्पूरमंजरी सव्वंगबित्थारिदलोअणो पिअंतो बिअ अबलोएसि? किं तदो बि परिहीअमाणगुणा देबी?** (भोः! देवीगते प्रणयप्ररूढेऽपि प्रेमणि किमिति कर्पूरमञ्जरीं सर्वाङ्गबिस्तारितलोचनः पिबन्निव अवलोकयसि? कि ततोऽपि परिहीयमाणगुणा देवी?)

विदूषक—**उन्मत्त हुआ राजा, भूख से व्याकुल ब्राह्मण, पुरुषसंसर्ग को चाहने वाली धूर्त स्त्री और विरही मनुष्य मन के लड्डुओं से अपने को प्रसन्न रखता है। मित्र! बताओ तो, यह किसका प्रभाव है?**

राजा—**प्रेम का।**

विदूषक—**मित्र! महारानी से इतना प्रेम होने पर भी कर्पूरमञ्जरी को इस तरह देखते हो जैसे कि सारे अंग में आंखे लगाकर उसे पी जाओगे। क्या महारानी के गुण कर्पूरमञ्जरी से कुछ कम हैं?**

परिरम्भः = निधुवनपरिरम्भः = सुरतालिङ्गनम्। निर्भरोत्तुङ्गयोः = अन्यन्तमुन्नतयोः। विबुद्धः = जागरितः॥ ७॥

टिप्पणी—क्षुधया क्लान्तः = क्षुधाक्लान्तः-भूख से थका हुआ। अविनीत हृदय यस्याः सा अविनीतहृदया = पुरुषसंसर्गाभिलषितचित्ता-पुरुषसहवास चाहने वाली। विडम्बयति = धोखा देता है।

टिप्पणी—पिबन् = पीता हुआ-√ पा (पिब्) + अत्-शत्रन्त। परिहीयमाणाः

राजा—मा एव्वं भण (मैवं भण)—

कदावि संघडइ कस्स वि प्पेमगंठो
एव्वमेव तत्थ ण हु कारणमत्थि रूअं।
चंगत्तणं उण महिज्जदि जं तहिं पि
ता दिज्जए पिसुणलोअमुहेसु मुद्दा ॥ ९ ॥

(कदाऽपि सङ्घटते कस्यापि प्रेमग्रन्थिः
एवमेव तत्र न खलु कारणमस्ति रूपम् ।
चङ्गत्वं पुनर्मृग्यते यत्तत्रापि
तद्दीयते पिशुनलोकमुखेषु मुद्रा ॥ ९ ॥)

अन्वयः—कदा अपि कस्य अपि प्रेमग्रन्थिः एवमेव सङ्घटते, तत्र रूपम् न खलु कारणम् अस्ति । तत्रापि यत् पुनः चङ्गत्वम् मृग्यते, तत् पिशुनलोकमुखेषु मुद्रा दीयते ।

सरलार्थः—कस्मिन्नपि काले कस्यापि प्रेमबन्धः कश्चित् प्रति एवमेव कारणं विना सङ्घटते, अस्मिन् प्रेमबन्धे सौन्दर्यं कारणं न भवति । यथोक्तं भवभूतिना उत्तररामचरिते—'व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते । विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥' तत्रापि प्रेम्णः आन्तरहेतुकत्वेऽपि यत्पुनः सौन्दर्यं मृग्यते अन्विष्यते तत्

राजा—ऐसा मत कहो ।

किसी भी समय किसी का किसी पर प्रेम यों ही हो जाता है, इस प्रेमबन्धन में सौन्दर्य कारण नहीं होता। फिर भी प्रेम में सौन्दर्य को जो कारण बताया जाता है वह दुष्ट लोगों के मुंह को बन्द करने के लिये ही—दुष्ट लोग जिस किसी से भी प्रेम करने को बुरा न बतायें इस लिये सुन्दरता आदि गुणों का उल्लेख कर दिया जाता है ॥ ९ ॥

गुणाः यस्याः सा परिहीयमाणगुणाः कम गुण वाली-परि √हा+य+आन-परिपूर्वक हा धातु से कर्मवाच्य में आनच्, म् का आगम । चङ्गस्य भावः=चङ्गत्वम्=सौन्दर्य । मृग्यते= अन्विष्यते-खोजा जाता है । मुद्रा=पर्दा । आवरणपिशुन=एक दूसरे की चुगली खानेवाला ॥ ९ ॥

विदूषकः—भो ! किं उण एदं प्पेम प्पेमत्ति भणंति ?।
(भोः ! कि पुनरेतत् प्रेम प्रेमेति भणन्ति ?)

राजा—अण्णोण्णमिलिदस्स मिहुणस्स मअरद्धअसासणे प्परूढं प्पणअग्गंठिं प्पेमेत्ति छइल्ला भणंति । (अन्योऽन्यमिलितस्य मिथुनस्य मकरध्वजशासने प्ररूढं[1] प्रणयग्रन्थि प्रेमेति विदग्धा भणन्ति ।)

विदूषकः—कीदिसो सो ? (कीदृशः सः ?)

राजा—जस्सि बिकप्पघडणाइकलंकमुक्को
अत्ताणअस्स सरलत्तणमेइ भावो ।
एक्कक्कअस्स प्पसरंतरसप्पवाहो
सिंगारवड्ढिअमणोभवदिण्णसारो ॥ १० ॥

(यस्मिन् विकल्पघटनादिकलङ्कमुक्तः
आत्मनः सरलत्वमेति भावः ।

पिशुनानां लोकानां मुखेषु मुद्रादानाय आवरणदानायैव भवति । पिशुनाः जनाः निन्दां मा कुर्युरिति तेषां मुखबन्धनाय सौन्दर्यादिगुणाः कीर्त्यन्ते ॥ ९ ॥

अन्वयः—यस्मिन् एकैकस्य आत्मनः भावः विकल्पघटनादिकलङ्कमुक्तः प्रसरद्रसप्रवाहः शृङ्गारवर्धितमनोभवदत्तसारः (सन्) सरलत्वम् एति ।

व्याख्या—यस्मिन् प्रेमणि सति एकैकस्य उभयस्य आत्मनः भावः आशयः

विदूषक—यह 'प्रेम-प्रेम' किसे कहा जाता है ?

राजा—एक दूसरे के पास बैठे हुये स्त्री पुरुषों का कामदेव की आज्ञा से उत्पन्न हुआ भाव प्रेम कहलाता है ।

विदूषक—वह भाव कैसा होता है ?

राजा—जिस भाव के उत्पन्न होने पर एक दूसरे के चित्त के विचारसंशय इत्यादि

---

[1] प्ररूढ = उत्पन्न ।

टिप्पणी—विकल्पाना घटनादयः ये कलङ्काः तैः मुक्तः = विकल्पघटनादिकलङ्कमुक्तः =

एकैकस्य प्रसरद्रसप्रवाहः

श्रृङ्गारवर्द्धितमनोभवदत्तसारः ॥ १० ॥)

विदूषकः—कधं बिअ सो लक्खोअदि ? (कथमिव स लक्ष्यते ?)

राजा—जाणं सहावप्पसरंतसुलोलदिट्ठी-

पेरंतलुंठिअमणाणं परप्परेण ।

बड्ढंतमम्महविदीण्णरसप्पसारो

ताणं प्पआसइ लहुं बिअ चित्तभावो ॥११॥

(ययोः स्वभावप्रसरत्सुलोलदृष्टि-

पर्यन्तलुण्ठितमनसोः परस्परेण ।

विकल्पाना घटनादिभिः कलङ्कैः मुक्तः विरहितः, आनन्दस्रोतसः प्रवाहेण च युक्तः तथा श्रृङ्गारेण वर्धितः उल्लसन् यः कामः तेन उत्कर्षम् प्राप्तः सन् सरलत्वम् आर्जवमेति, सुखदुःखे समे भवतः स भावप्रेमेति कथ्यते ॥ १० ॥

अन्वयः—ययोः परस्परेण स्वभावप्रसरत्सुलोलदृष्टिपर्यन्तलुण्ठितमनसोः वर्धमानमन्मथवितीर्णरसप्रसारः, तयोः चित्तभावः लघु इव प्रकाशते ।

व्याख्या—परस्परेण अन्योऽन्येन स्वभावतः प्रसरन्त्यः प्रचलन्त्यः सुलोलाः

भावों से रहित हो जाते हैं, जिसमें आनन्द का स्रोत सा बहता है और श्रृङ्गार से प्रवृद्ध कामदेव के द्वारा जिसमें उत्कर्ष आजाता है तथा सरलता आजाती है वह भावप्रेम कहलाता है ॥ १० ॥

विदूषक—वह भाव किस तरह दिखाई पड़ता है ?

राजा—आपस में स्वभाव से ही बड़ी और चञ्चल आंखों के कटाक्षों के प्यासे

सशयादिदोषविरहितः । प्रसरन् रसप्रवाहः यत्र सः प्रसरद्रसप्रवाहः=प्रवहदानन्दस्रोताः= बहते हुये आनन्द के प्रवाह से युक्त । श्रृङ्गारेण वर्द्धितः=श्रृङ्गारवर्धितः, स चासौ मनोभवः-श्रृङ्गारवर्धितमनोभवः, तेन दत्तः सारः यस्य स श्रृङ्गारवर्धितमनोभवदत्तसारः=श्रृङ्गार से बढ़े हुये काम ने जिसको उत्कर्ष प्रदान किया है ॥ १० ॥

टिप्पणी—स्वभावेन प्रसरन्त्यः सुलोलाश्च या दृष्टयः=स्वभावप्रसरत्सुलोलदृष्टयः,

वर्द्धमानमन्मथवितीर्णरसप्रसार-

स्तयोः प्रकाशते लघुरिव चित्तभावः ॥ ११ ॥)

अवि अ (अपि च)—

अंतो णिविट्ठमअणविब्भमडंबरं जं

तं भण्णए अ मअणमंडणमेत्थ प्पेम्मं ।

दुल्लक्खअं पि जं पअडेइ जणो जअम्मि

तं जाणिमो अ सुबहुलं मअणिंदजालं ॥१२॥

(अन्तर्निविष्टमदनविभ्रमडम्बरं यत्

तत् भण्यते च मदनमण्डनमत्र प्रेम ।

सुचञ्चलाः याः दृष्टयः तासा पर्यन्तेषु अपाङ्गावलोकनेषु लुण्ठितमनसो· सतृष्णयो· ययोः दम्पत्योः वर्धमानेन मन्मथेन रसप्रसार· उल्लासातिरेक· वितीर्ण· उत्पन्न· दृश्यते, तयो· दम्पत्योः चित्तभाव· द्रुत इव प्रकाशते प्रकटीभवति ॥ ११ ॥

अन्वयः—यत् अन्तर्निविष्टमदनविभ्रमडम्बरम्, तत् अत्र मदनमण्डनम् प्रेम भण्यते । जगति जन· दुर्लक्ष्यम् अपि यत् प्रकटयति तत् सुबहुलम् मदनेन्द्र-जालम् जानीमश्च ।

व्याख्या—अन्तर्निविष्टस्य हृदयंगतस्य मदनस्य यत् विभ्रमडम्बरम् प्रिय-

---

जिन स्त्री–पुरुषों में आनन्दातिरेक प्रवृद्ध कामदेव द्वारा उत्पन्न दिखाई पड़ता है, उन स्त्री–पुरुषों के मन का अभिप्राय बहता हुआ सा प्रकट होता है ॥ ११ ॥

और भीः—

हृदय को प्रभावित किये हुये कामदेव का जो विलसाडम्बर है वह ही इस

तासां पर्यन्तेषु लुण्ठितं मनः ययोः तयोः स्वभावप्रसरत्सुलोलदृष्टिपर्यन्तलुण्ठितमनसोः = चञ्चलापाङ्गावलोकनसतृष्णयोः=चञ्चल कटाक्षों द्वारा देखने के लिये लालायित। वर्धमानश्चासौ मन्मथः = वर्धमानमन्मथः, तेन वितीर्णः रसप्रसारः = वर्धमानमन्मथवितीर्णरसप्रसारः = प्रवृद्धकामदेवप्रदत्तोल्लासातिरेकः–बढे हुए कामदेव के द्वारा दिया हुआ आनन्दातिरेक। लघुरिव = बहता हुआ सा ॥ ११ ॥

टिप्पणी—अन्तर्निविष्टश्चासौ मदन = अन्तर्निविष्टमदनः, तस्य विभ्रमडम्बरम् =

(किं मेखलावलयनूपुरशेखरैः ?
किं चङ्गिमत्वेन ? किमु मण्डनाडम्बरैः ?
तदन्यदस्तीह किमपि नितम्बिन्यो
येन लभन्ते सुभगत्वमञ्जरीः ॥ १३ ॥)

अवि अ (अपि च)—

किं गेअणिट्टविहिणा ? किमु वारुणीए ?
धूवेण किं अगुरुणा ? किमु कुङ्कुमेण ?
मिट्टत्तणे महिदलम्मि ण किं बि अण्णं
च्चीअ अत्थि सरिसं उण माणुसस्स ? ॥१४॥

(किं गेयनृत्यविधिना ? किमु वारुण्या ?

अन्वयः—मेखलावलयनूपुरशेखरैः किम्, चङ्गिमत्वेन किम्, मण्डनाडम्बरैः किमु, येन नितम्बिन्यः सुभगत्वमञ्जरीः लभन्ते, इह तत् अन्यत् किमपि अस्ति ।

सरलार्थः—मेखलावलयनूपुरशेखरैः किमपि फलं न, सौन्दर्यमपि न किमपि प्रयोजनं साधयति, मण्डनाडम्बरैः अन्यैः प्रसाधनैः अपि न किमपि कार्यं सिध्यति । येन कारणेन कामिन्यः सौभाग्यकलाः लभन्ते प्राप्नुवन्ति, तदत्र संसारे किमपि अन्यदेवास्ते, तारामैत्री चक्षूराग एव कामिनीषु सौन्दर्यसृष्टिं करोति ॥ १३ ॥

सरलार्थः—गानेन नृत्येन च न किमपि सिध्यति, वारुण्या मदिरया चापि

करधनी, कंगन, पायजेब और सिर के आभूषण से कुछ नहीं होता है। सौन्दर्य भी कहीं कहीं व्यर्थ रहता है। बाह्य श्रृङ्गार भी व्यर्थ है। संसार में यह तो कोई और ही चीज है जिससे स्त्रियाँ आकर्षक लगती हैं ॥ १३ ॥

और भी :—

गाने और नाचने से कुछ नहीं होता है, मदिरा भी बेकार है, अगुरु का

टिप्पणी—मण्डनानाम् आडम्बरः = मण्डनाडम्बरस्तस्य विडम्बनया = प्रसाधनप्रयासेन । मेखला = करधनी । वलय = कङ्कन । नूपुर = पायजेब । चगिमत्वम् = सौन्दर्य । प्रशस्तौ नितम्बौ स्तः यासां ताः नितम्बिन्यः-प्राशस्त्य में इन् प्रत्ययः । सुभगत्वमञ्जरी = सौभाग्यकलाः ॥ १३ ॥

टिप्पणी—गेयम् च नृत्य च गेयनृत्ये तयो विधिना = गेयनृत्यविधिना = नाचने गाने

धूपेन किमगुरुणा ? किमु कुङ्कुमेन ।
मधुरत्वे महीतले न किमप्यन्यत्
रुचेरस्ति सदृशं पुनर्मानुषस्य ॥ १४ ॥)

अबि अ (अपि च)—

जा चक्कवट्टिघरिणी जणगेहिणी वा
पेम्मम्मि ताण ण तिलं बि बिसेसलाभो ।
जाणे सिरीअ जइ किज्जदि को बि भावो
माणिक्कभूसणणिअसणकुंकुमेहिं ॥ १५ ॥
(या चक्रवर्त्तिगृहिणी जनगेहिनी वा
प्रेम्णि तयोर्न तिलमात्रमपि विशेषलाभः ।

न किमपि प्रयोजनम् । अगुरोः धूपोऽपि निरर्थकः । कुङ्कुमराग अपि निष्फल एव । मानुषस्य रुचेः सदृशं किमपि वस्तु मधुरत्वे पृथिव्यां न तिष्ठति । यत्र मनुष्यः अनुरक्तो भवति तदेव तस्मै रोचते ॥ १४ ॥

अन्वयः—या चक्रवर्तिगृहिणी, (या) वा जनगेहिनी, तयोः प्रेम्णि तिल-मात्रमपि विशेषलाभः न (अस्ति) । यदि श्रिया कोऽपि भाव' क्रियते, (तदा) माणिक्यभूषणनिवसनकुंकुमैः (स भवति) इति जाने ।

सरलार्थः—या चक्रवर्तिनः राज्ञ' गृहिणी महिषी, या वा सामान्यजनपत्नी,

---

सुगन्धित धुआँ भी निरर्थक है, कुङ्कुमराग से भी कुछ लाभ नहीं । मनुष्य की रुचि के समान पृथ्वी पर कोई भी वस्तु मधुर नहीं है ॥ १४ ॥

और भी:—

चाहे चक्रवर्ती राजा की रानी हो, या साधारण पुरुष की स्त्री हो, इन दोनों के प्रेम में तिलभर भी भेद नहीं होता है । अगर सौन्दर्य शोभा से कोई भाव होता है

से । वारुणी = मदिरा । अगुरु = एक गन्धयुक्त लकडी ॥ १४ ॥

टिप्पणी—माणिक्यभूषणं निवसनं कुकुमश्च तै. माणिक्यभूषणनिवसनकुङ्कुमैः । जन

जाने श्रिया यदि क्रियते कोऽपि भावी
माणिक्यभूषणनिवसनकुङ्कुमैः ॥ १५ ॥)

अवि अ (अपि च)—

किं लोअणेहिं तरलेहिं ? किमाणणेण
चंदोबमेण ? थणएहिं किमुण्णएहिं ?
तं कि पि अण्णमिह भूबलए णिमित्तं
जेणंगणाअ हिअआउ ण ओसरंति ॥ १६ ॥

(कि लोचनैस्तरलैः ? किमाननेन
चन्द्रोपमेन ? स्तनैः किमुन्नतैः ?
तत्किमप्यन्यदिह भूवलये निमित्तं
येनाङ्गना हृदयान्नापसरन्ति ॥ १६ ॥)

तयोः प्रेम्णि अणुमात्रमपि प्रभेदो न भवति। यदि सौन्दर्यशोभया कोऽपि भाव-प्रणयः क्रियते तदा स माणिक्यभूषणेन निवसनेन कुङ्कुमं न च भवति इति जाने मन्ये ॥१५॥

अन्वयः—तरलैः लोचनैः किम्, चन्द्रोपमेन आननेन किम्? उन्नतैः स्तनैः किम्? इह भूवलये तत् किमपि अन्यत् निमित्तम्, येन अङ्गनाः हृदयात् न अपसरन्ति।

सरलार्थः—चञ्चलै नेत्रैः किं प्रयोजनम्? चन्द्रसदृशेन मुखेनापि किम्?

तो वह मानसिक, आभूषण, सुन्दर वस्त्र और कुङ्कुम से होता है—ऐसा मैं समझता हूँ ॥ १५ ॥

और भी:—

चञ्चल नेत्रों से क्या? चन्द्रमा जैसे मुख से भी कोई लाभ नहीं। उन्नत उरोजों से भी क्या प्रयोजन। इस संसार में कोई और ही कारण है जिससे स्त्रियाँ पुरुष के हृदयों को अपने वश में कर लेती हैं ॥ १६ ॥

गेहिनी = साधारण पुरुष की स्त्री। तिलमात्रम् = लेशमात्र भी। चक्रवर्तिगृहिणी = चक्रवर्ती राजा की रानी ॥ १५ ॥

टिप्पणी—तरल = चञ्चल। चन्द्रः अस्ति उपमा यस्य तेन चन्द्रोपमेन = शशिसदृशेन। अपसरन्ति = हटती हैं, अप $\sqrt{}$सृ + अ + अन्ति ॥ १६ ॥

विदूषकः—एव्वं णेदं, किं उण अण्णं पि मे कधेसु, जं, कुमारत्तणे माणुसस्स अमणोज्जमेतस्सिं वि तरुणत्तणे चंगत्तणं बड्ढदि। (एवमेतत्, किं पुनरन्यदपि मे कथय, यत् कुमारत्वे मानुषस्यामनोज्ञम्, एतस्मिन्नपि तारुण्ये चङ्गत्वं वर्द्धते ?)

राजा—

णूणं दुवे इह पजावइणो जअम्मि
जे देहणिम्मवणजोव्वणदाणदक्खा।
एक्को घडेदि पढमं कुमरीणमंगं
उक्कारिऊण पअडेइ उणो दुदीओ॥ १७॥

(नूनं द्वाविह प्रजापती जगति
यौ देहनिर्माणयौवनदानदक्षौ।

उच्चैः स्तनैरपि न कोऽपि गुणः। अस्मिन भूमण्डले किमप्यन्यदेव कारणं येन नार्यः नराणां हृदयात् न निर्गच्छन्ति। पुरुषाणां हृदयानि वशीकुर्वन्ति॥ १६॥

अन्वयः—इह जगति द्वौ प्रजापती, यौ देहनिर्माणयौवनदानदक्षौ (स्तः)। एकः कुमारीणाम् अंगम् प्रथमं घटयति, द्वितीयः पुनः उत्कीर्य्य प्रकटयति।

सरलार्थः—अस्मिन् संसारे द्वौ विधातारौ स्तः, यौ देहरचनायां यौवनदाने च प्रवीणौ स्तः, अनयोः एकः ब्रह्मा प्रथमं कुमारीणां केवलं शरीरमेव रचयति, पुनः

विदूषक—यह तो ऐसा है ही, कुछ और भी मुझे बताओ। यह क्या बात है कि जो (मनुष्य) कुमारावस्था में सुन्दर नहीं लगता, वह युवावस्था में सुन्दर हो जाता है ?

राजा—इस संसार में दो प्रजापति हैं, जो शरीर बनाने में और यौवन देने में चतुर हैं। इनमें ब्रह्मा तो केवल कुमारियों का शरीर ही बनाता है किन्तु

टिप्पणी—तरुणस्य भावः=तारुण्यम्-युवावस्था-तरुण शब्द से भावार्थक ष्यञ् प्रत्यय।

टिप्पणी—घटयति=बनाता है घट् चेष्टायाम् (भ्वादि आत्मने०) से ण्यन्त में लट्

एको घटयति प्रथमं कुमारीणामङ्गम्
उत्कीर्य्य प्रकटयति पुनर्द्वितीयः ॥ १७ ॥)

तेण अ (तेन च)—

रणिदवलअकंचीणेउराबासलच्छी
मरगदमणिमाला गोरिआ हारजट्ठी ।
हिअअहरणमंत्तं जोब्बणं कामिणीणं
जअदि मअणकंडं छट्ठअं बड्ढअं अ ॥ १८ ॥

(रणितवलयकाञ्चीनूपुरावासलक्ष्मी-
मरकतमणिमाला गौरिका हारयष्टिः ।

द्वितीयः कामः अंगानि उन्मील्य प्रकाशयति । ब्रह्मा तु केवलं शरीरं रचयत्येव, कामस्तु शरीरे सौन्दर्यसृष्टिं करोति । ब्रह्मापेक्षया काम निपुणतर इति भावः ॥१७॥

अन्वयः—रणितवलयकाञ्ची नूपुरावासलक्ष्मीः (तिष्ठतु), मरकतमणिमाला गौरिका हारयष्टि (तिष्ठतु), षष्ठक वर्धकः च मदनकाण्डः कामिनीनां हृदयहरण-मन्त्रम् यौवनं जयति ।

व्याख्या—रणितानां शिञ्जिताना वलयानां कंकणानां काञ्चीनाम् रशनानाम् नूपुराणां च आवासेन धारणेन या लक्ष्मीः शोभा सा तिष्ठतु तावत्, न तस्या· काप्यावश्यकता । एवमेव मरकतमणीनां माला, गौरिका काञ्चनी हारयष्टिर्वा तिष्ठतु । षष्ठः वर्धक प्रबलतरः च मदनशरः इव इदं हृदयवशीकरणमन्त्रम्

शरीर का विकास तो कामदेव के द्वारा ही होता है ॥ १७ ॥

और उससेः—

बजते हुये कङ्कण, करधनी और पायजेबों के पहिनने से उत्पन्न होने वाली शोभा तो कुछ भी नहीं है, मरकतमणियों की माला तथा सोने का हार भी रहने दो । हृदय को वश में करने वाला तथा कामदेव के छठे और प्रबल बाण के समान

लकार । उत्कीर्य्य=खिलाकर, उन्मील्य–उत् √कृ+य–ल्यबन्त । कृ की ऋ को इर् आदेश ।

टिप्पणी—रणित=बजता हुआ । आवासः धारण करना । गौरिका=सोने का । मदन

हृदयहरणमत्रं यौवनं कामिनीनां
जयति मदनकाण्डः षष्ठको वर्द्धकश्च ॥ १८ ॥)

तहा अ (तथा च)—

अंगं लाबण्णपुण्णं स्सवणपरिसरे लोअणा हारतारा
वच्छं थोरत्थणिल्लं तिबलिबलइदं मुट्ठिगेण्हं अ मज्झं ।
चक्काआरो णिदंबो तरुणिमसमए किं णु अण्णेण कज्जं ?
पंचेहि ज्जेब्ब बाला मअणजअमहावैजअंतीअ होंति ॥ १९ ॥

(अङ्ग लावण्यपूर्णं श्रवणपरिसरे लोचने हारतारे
वक्षः स्थूलस्तनं त्रिवलित्रलयितं मुष्टिग्राह्यञ्च मध्यम् ।

कामिनीनां यौवनं जयति सर्वोत्कर्षेण वर्तते । यद्यपि मदनस्य अन्येऽपि पञ्चशराः सन्ति, तथापि यौवनरूपोऽयं षष्ठः शरः प्रबलतरः, सर्वंजगच्च वशीकरोति ॥ १८ ॥

अन्वयः—तरुणिमसमये लावण्यपूर्णम् अंगम्, हारतारे श्रवणपरिसरे लोचने, स्थूलस्तनम् वक्ष, त्रिवलिवलयितं मुष्टिग्राह्यम् च मध्यम्, चक्राकार नितम्बः, (एभिः) पञ्चभिः एव बाला. मदनजयमहावैजयन्त्यः भवन्ति, अन्येन किं न कार्यम्?

सरलार्थः—युवावस्थायाम् कामिनीनाम् अंगम् लावण्येन पूर्णं भवति, आकर्षके कर्णपर्यन्तमायते च नयने भवत', वक्षसि पीनौ पयोधरौ च समागच्छत., कटि-प्रदेशश्च त्रिवलिभि' त्रिसृभि. रेखाभि' वलयितं वेष्टित मुष्टिमेयश्च सञ्जायते, नितम्बौ

कामिनियों का यह यौवन ही सर्वोत्कृष्ट है ॥ १८ ॥

वैसे भीः—

युवावस्था में सुन्दरियों का शरीर लावण्य से भरपूर हो जाता है, आंखें भी आकर्षक और बड़ी लगने लगती हैं, वक्षःस्थल पर स्तन खूब उभर आते हैं, कमर पतली हो जाती है तथा उस पर त्रिवलियाँ पड़ जाती हैं, नितम्बभाग खूब सुडौल और गोल हो जाता है। इन पांच अङ्गों से ही बालायें कामदेव के संसार

काण्ड=काम का बाण । षण्णां पूरण.=षष्ठः, स्वार्थ में क प्रत्यय-षष्ठक=छठा । वर्धक.=प्रबल ॥ १८ ॥

टिप्पणी—लावण्येन पूर्णम्=लावण्यपूर्णम्=लावण्यपूर्णम्=कान्तियुक्तम् । हारा तारा ययोः ते हारतारे=उत्कृष्टकनीनिके, आकर्षके । श्रवणपरिसरे=कान तक खींचे हुये ।

चक्राकारो नितम्बस्तरुणिमसमये किं त्वन्येन कार्यम् ?
पञ्चभिरेव बाला मदनजयमहावैजयन्त्यो भवन्ति ॥ १६ ॥)

[नेपथ्ये]

सहि कुरंगिए ! इमिणा सिसिरोबआरेण णलिणिब्ब कामं किलिस्सामि (सखि कुरङ्गिके ! अनेन शिशिरोपचारेण नलिनीव कामं क्लाम्यामि)—

बिस ब्ब बिसकंदली बिसहर ब्ब हारच्छडा
बअस्समिब अत्तणो किरइ तालबिताणिलो ।
तहा अ करणिग्गदं ज्जलइ जंतधाराजलं
ण चंदणमहोसहं हरइ देहदाहं अ मे ॥ २० ॥

(विषमिव बिसकन्दली विषधर इव हारच्छटा
वयस्थमिवात्मनः किरति तालवृन्तानिलः ।

च मण्डलाकारौ सुवर्तुलौ परिणमतः, एभि पञ्चभिः एव कामिन्यः मदनस्य जगद्विजये महावैजयन्त्यः महापताकाः भवन्ति, अन्येन यौवनादन्येन किमपि प्रयोजन नेत्यर्थः।

अन्वयः—बिसकन्दली विषमिव, हारच्छटा विषधर इव। तालवृन्तानिलः

विजय में पताका का काम करती हैं अर्थात् सबसे आगे रहती हैं। किसी और की आवश्यकता ही क्या है ॥ १९ ॥

(नेपथ्य में)

सखि ! कुरंगिके ! इस शिशिरोपचार से कमलिनी की तरह अत्यन्त उकता गई हूं। कमल का नाल विष की तरह मालूम पड़ता है, हार सांपों की तरह लगते हैं।

स्थूलौ स्तनौ यस्मिन् तत् स्थूलस्तनम्=उठे हुए स्तनों वाला। मुष्टिना ग्राह्यम्=मुष्टिग्राह्यम्=मुट्ठी के बराबर। त्रिवलिवलयितम्=तीन रेखाओं से युक्त। चक्रस्येव आकारो यस्य स चक्राकार =गोल, सुडौल। मदनस्य मदनकर्तृकस्य जये महावैजयन्त्यः=मदनजयमहापताकाः ॥ १९ ॥

टिप्पणी—शिशिरोपचारः=ठण्ढक पहुचाने का उपाय। कामम्=अत्यन्त। क्लाम्यामि- √क्लम्+य+मि-(दिवादि-श्यन्। लट् लकार) उकताती हूँ।

टिप्पणी—बिसकन्दली=कमल का नाल। तालवृन्तानिल.=पखे की हवा। किरति=

तथा च करनिर्गतं ज्वलति यन्त्रधाराजलं
न चन्दनमहौषधं हरति देहदाहं च मे ॥ २० ॥)

विदूषकः—सुदं प्पिअवअस्सेण ? भरिआ कण्णा पीऊसगंडूसेहिं; ता किं अज्जवि उपेक्खोअदि घणघम्मेण किलिमंती मुणालिआ ? गाढकड्ढणदुस्सहेण सलिलेण सिंचिज्जंती केलिकुंकुमत्थली ? छम्मासिअमोत्तिआणं झडित्ति फुडती एकाबलिआ ? गंठिवण्णकेदारिआ लंठिज्जती गंधहरिणेण ? ता सच्चं दे सिबिणअं संपण्णं। एहि, प्पविसम्ह। उठ्ठिज्जदु मअरद्धअपदाआ। प्पअट्टदु कंठकुहरम्मि पंचमहुंकाराणां रिंच्छोली। थक्कंतु बाप्फप्पबाहा। मंथरिज्जंतु णीसासप्पसरा। लहदु लावण्णं उणो णवभावं। ता एहि, खिडक्किआदुआरेण प्पविसम्ह। (श्रुतं प्रियवयस्येन ? भृतौ कर्णौ पीयूषगण्डूषैः; तत् किमद्यापि उपेक्ष्यते घनघर्मेण

आत्मनः वयस्यमिव किरति। तथा करनिर्गतम् यन्त्रधाराजलम् ज्वलति। चन्दनमहौषधं च मे देहदाहम् हरति।

सरलार्थः—मृणाललता विषमिव मे प्रतीयते, हारच्छटा हारावली सर्प इव मे प्रतिभाति। तालवृन्तेन व्यजनेन अभिव्यक्त अनिल· आत्मनः स्वरूपं वयस्यम् सखायम् अग्निमिव किरति वर्षति। तथा युष्माक करेभ्य· नि सृतनं यन्त्रधाराजलं तपति। चन्दनलेपश्च मे शरीरसन्तापं न हरति न शमयति। विभिन्ना· शीतोपचाराः विरुद्धमेव प्रभावमुत्पादयन्ति ॥ २० ॥

पंखों की हवा भी अपने मित्र अग्नि को ही फैलाती है। यन्त्रधाराओं का जल भी तप रहा है। चन्दन का लेप भी शरीर के ताप दूर नहीं करता है ॥ २० ॥

विदूषक—क्या प्रिय मित्र ने सुना ? कान जैसे अमृत रस से भर गये हों।

विखेरता है— √कृ+अ+ति। ऋ को इर् हो गया, तुदादि-लट् लकार। चन्दनमेव महौषधम्=चन्दनमहौषधम् ॥ २० ॥

टिप्पणी—पीयूषस्य गण्डूषा., तै. पीयूषगण्डूषै.=अमृत के रस से। भृतौ=भर गये।

क्लाम्यन्ती मृणालिका ? गाढकथितदुःसहेन सलिलेन सिच्यमाना केलिकुङ्कुमस्थली ? षाण्मासिकमौक्तिकानां झटिति स्फुटन्ती एकावली ? ग्रन्थिपर्ण–केदारिका लुण्ठ्यमाना गन्धहरिणेन ? तत् सत्यं ते स्वप्नं सम्पन्नम् । एहि, प्रविशावः । उत्थाप्यतां मकरध्वजपताका । प्रवर्त्ततां कण्ठकुहरे पञ्चमहूङ्काराणां रचना । स्तोकीक्रियन्तां बाष्पप्रवाहाः । मन्थरीक्रियन्तां निःश्वासप्रसराः । लभतां लावण्यं पुनर्नवभावम् । तदेहि, खिडक्किकाद्वारेण प्रविशावः ।)

[इति प्रविशतः]

[ततः प्रविशति नायिका कुरङ्गिका च]

तीव्र धूप से मुरझाती हुई मृणालिका की क्या अब भी उपेक्षा की जायगी ? खूब गरम और न सहने योग्य जल से खींची जाती हुई यह क्रीडाभूमि कब तक उपेक्षित रहेगी ? उत्कृष्ट मोतियों को एक दम गिराता हुआ यह हार कब तक उपेक्षित रहेगा ? ग्रन्थिपर्णों की यह क्यारी कस्तूरीमृत से बर्बाद होती हुई कब तक देखी जायगी ? तुम्हारा स्वप्न तो सच्चा ही हो गया। आओ, चलें। कामदेव के झण्डे को उठायें। कोयल की पुकार शुरू होने दो। इसके आंसुओं को रोकें। इसका चित्त शान्त करें। लावण्य फिर से नया हो। आओ, खिड़की के द्वार से अन्दर घुसें।

(अन्दर जाते हैं)

(तब नायिका और कुरङ्गिका रंगमंच पर आती हैं)

उपेक्ष्यते=उपेक्षा की जाती है—कर्मवाच्य लट् लकार। क्लाम्यन्ती=मुरझाती हुई √क्लम्+य+अत् (शत्रन्त–स्त्रीलिग)। सिच्यमाना सींची जाती हुई √सिच्+य+आन–शानच् प्रत्यय म् का आगम–कर्मवाच्य। केलिकुङ्कुमस्थली=क्रीडा करने की भूमि। षाण्मासिकमौक्तिक=छ. महीने में तैयार हुए मोती, अर्थात् उत्कृष्ट मोती। ग्रन्थिपर्ण केदारिका=एक प्रकार के सुगन्धित पत्तों की क्यारी। लुण्ठ्यमाना=लुटती हुई। उत्थाप्यताम्=उठानी चाहिये उद् √स्थापि य+ताम्–ण्यन्त कर्मवाच्य से लोट् लकार। स्तोकीक्रियन्ताम्=कम करने चाहिये। √स्तोकीकृ च्विप्रत्ययान्त से कर्मवाच्य में लोट् लकार प्रथम पुरुष का बहुवचन। मन्थरीक्रियन्ताम्=धीमी करो– √मन्थरीकृ से कर्मवाच्य में लोट् लकार, प्रथम पुरुष का बहुवचन। खिडक्किका=खिडकी।

नायिका—[ससाध्वसं स्वगतम्] अम्मो ! किं एसो सहसा गअणंगणादो अवदीण्णो पुण्णिमाहरिणंको ? किं वा तुट्टेण णीलकंठेण णिअदेहं लंभिदो मणोहओ ? किं वा हिअअस्स दुज्जणो णअणाणं सज्जणो जणो मं संभावेदि ? [प्रकाशम्] सहि कुरंगिए ! इंदजालं विअ पेक्खामि । (अहो ! किमेष सहसा गगनाङ्गनादवतीर्णः पूर्णिमाहरिणाङ्कः ? कि वा तुष्टेन नीलकण्ठेन निजदेहं लम्भितो मनोभवः ? किं वा हृदयस्य दुर्जनो नयनानां सुज्जनो जनो मां सम्भावयति ? [प्रकाशम्] सखि कुरङ्गिके ! इन्द्रजालमिव पश्यामि ।)

विदूषकः—[राजानं हस्ते गृहीत्वा] भोदि ! सच्चं इंदजालं संपण्णं । (भवति ! सत्यमिन्द्रजालं सम्पन्नम् ।)

[नायिका लज्जते]

कुरङ्गिका—सहि ! कप्पूरमंजरि ! अब्भुट्ठाणेण संभावेहि भट्टारअं । (सखि कर्पूरमञ्जरि ! अभ्युत्थानेन सम्भावय भट्टारकम् ।)

नायिका—(घबराहट के साथ अपने मन में) अरे ! यह एकाएक आसमान से पूर्णिमा का चन्द्रमा कैसे उतर आया ? क्या शिवजी ने प्रसन्न होकर कामदेव को उसका शरीर दे दिया ? क्या मेरे हृदय को चुराने वाला और आंखों को तृप्त करने वाला कोई मुझे प्रसन्न कर रहा है ? (जोर से) सखि कुरङ्गिके ! मैं तो जादू सा देखती हूँ ।

विदूषक—(राजा का हाथ पकड़ कर) वस्तुतः इन्द्रजाल ही हो गया ।

(नायिका शर्माती है)

कुरङ्गिका—सखी कर्पूरमञ्जरी ! उठकर महाराज का स्वागत करो ?

टिप्पणी—साध्वसम् = भय, घबराहट । अवतीर्णः = उतरा-अव + √तॄ + त = क्त-प्रत्यय-त को न आदेश-ॠ को ईर् = तीर्ण । पूर्णिमाहरिणाक. = पूर्णिमा का चन्द्रमा । नीलकण्ठः = शिव जी । लम्भित = प्राप्त कराई । इन्द्रजालम् = जादू । हृदयस्य दुर्जन = हृदय को चुराने वाला ।

१. सम्भावय = आदर करो-सम् √भावि से लोट लकार, मध्यमपुरुष एकवचन ।

[नायिका उत्थातुमिच्छति]

राज—[हस्तेन गृहीत्वा]—

उट्ठिऊण थणभारभंगुरं मा मिअंकमुहि ! भंज मज्झअं ।
तुज्झ ईरिसणिवेसदंसणे लोअणाणं मअणो प्पसीददु ॥२१॥

(उत्थाय स्तनभारभङ्गुरं मा मृगाङ्कमुखि ! भञ्जय मध्यम् ।
तवेदृशनिवेशदर्शनाल्लोचनयोर्मदनः प्रसीदतु ॥ २१ ॥)

अबि अ (अपि च)—

जिस्सा पुरो ण हरिदा दलिआ हलिद्दा
रोसाणिअं ण कणकं ण अ चंपआइं ।
ताइं सुवण्णकुसुमेहिं बिलोअणाइं
अच्चेमि जेहि हरिणक्खि ! तुमंसि दिट्ठा ॥ २२ ॥

अन्वयः—हे मृगाङ्कमुखि ! उत्थाय स्तनभारभंगुरं मध्यम् मा भञ्जय । तव ईदृशनिवेशदर्शनात् (मम) लोचनयो मदन· प्रसीदतु ।

सरलार्थः—हे चन्द्रानने ! उत्थानेन स्तनयोः भारेण भंगप्रवणं कटिदेशम् मा भग्नं कुरु । त्वाम् ईदृश्यामवस्थायां दृष्ट्वा मम नेत्रे प्रसादमनुभवतः ॥ २१ ॥[1]

(नायिका उठना चाहती है)

राजा—(हाथ पकड कर):—

अयि चन्द्रमुखी ? मेरे स्वागत के लिये उठ कर स्तनों के भार से झुकी हुई अपनी कमर को मत तोड़ो । तुमको इस अवस्था मे देख कर ही मेरे नेत्र प्रसन्न हो रहे हैं ॥ २१ ॥

और भीः—

---

२. उत्थातुम्–उठने को–उद् √स्था + तुम् = उत्थातुम्–तुमुन् प्रत्यय ।

टिप्पणी—स्तनयो· भार = स्तनभार·, तेन भङ्गुरम् = स्तनभारभङ्गुरम् = स्तनभार-भुग्नम् । मृगस्य अङ्क· अस्ति यस्मिन् स मृगाङ्कश्चन्द्र , तस्य इव मुख यस्याः सा तत्सम्बुद्धौ मृगाङ्कमुखिः ! चन्द्रमुखि ! मदनः = इच्छा । प्रसीदतु = पूरी हो ॥ २१ ॥

(यस्याः पुरो न हरिता दलिता हरिद्रा
उज्ज्वलीकृतं न कनकं न च चम्पकानि ।
ते सुवर्णकुसुमैर्विलोचने
अर्चयामि याभ्यां हरिणाक्षि ! त्वमसि दृष्टा ॥२२॥)

विदूषकः—**गब्भघरबासेण सेअसलिलसित्तगत्ता संभूदा तत्थ भोदी कप्पूरमंजरी; ता इमं सिचअंचलेण बीजइस्सं दाव ।** [तथा कुर्वन्] । **हा ! हा ! कधं बरिल्लपबरोण णिव्बणो प्पदीबो ।** [विचिन्त्य स्वगतम्] । **भोदु, लीलोज्जाणं ज्जेब्ब गच्छम्ह ।** [प्रकाशम्] । **भो अंधआरणच्चिदं बट्टदि, ता णिक्कामम्ह सुरंगामुहेण ज्जेव्ब प्पमदज्जाणं दाव ।** (गर्भगृहवासेन

अन्वयः—हे हरिणाक्षि ! यस्या पुरः दलिता हरिद्रा न हरिता, कनकम् न उज्ज्वलीकृतम्, चम्पकानि च न, सा त्वं याभ्यां दृष्टा असि, ते विलोचने सुवर्णकुसुमैः अर्चयामि ।

सरलार्थः—हे मृगनयने ! यस्याः तव अग्रत पिष्टा हरिद्रा अपि न हरिद्रात्वेन गणनीया, सुवर्णमपि च न उज्ज्वलं प्रतिभाति, चम्पकपुष्पाणि च परिहीनानि दृश्यन्ते, स त्वं मया याभ्यां मल्लोचनाभ्यां दृष्टा असि, ते मदीये लोचने अहं सुवर्णकुसुमै' पूजयामि । लब्धं मम नेत्राभ्याम् साफल्यमिति भाव' ॥ २२ ॥

अयि हरिनी से नयनोंवाली ! तेरे सामने पिसी हुई हल्दी भी कुछ नहीं है, साफ किया हुआ सोना भी तेरे सौन्दर्य के सामने तुच्छ है, चम्पा के फूल भी तेरी तुलना नहीं कर सकते । मेरी जिन आंखों ने तुझ को देखा है, उनकी मैं सुवर्ण के फूलों से पूजा करूंगा ॥ २२ ॥

विदूषक—**अन्तर्गृह में रहने से कर्पूरमञ्जरी के सारे शरीर पर पसीना आ**

टिप्पणी—दलिता=पिसी हुई । हरिद्रा=हल्दी । अर्चयामि=पूजा करता हू, √अर्च पूजायाम् (चुरादि) । हरिणाक्षि=हिरन जैसे नेत्रों वाली, हरिणस्येव अक्षिणी यस्याः तत्सम्बुद्धौ हरिणाक्षि=मृगनयने ॥ २२ ॥

टिप्पणी—गर्भगृहम्=घर के अन्दर का भाग । स्वेदस्य सलिलेन सिक्त गात्रं यस्याः

स्वेदसलिलसिक्तगात्रा सम्भूता तत्रभवती कर्पूरमञ्जरी; तदिमां सिचयाञ्चलेन वीजयिष्यामि तावत्। [तथा कुर्वन्] हा ! हा ! कथं वस्त्राञ्चलपवनेन निर्वाणः प्रदीपः। [विचिन्त्य स्वगतम्] भवतु, लीलोद्यानमेव गच्छामः। [प्रकाशम्] भोः ! अन्धकारनृत्य वर्त्तते, तन्निष्क्रमामः सुरङ्गामुखेनैव प्रमदोद्यानं तावत्।)

[सर्वे निष्क्रमणं नाटयन्ति]

राजा—[कर्पूरमञ्जरीं करे धृत्वा]—

मज्झ हत्थट्ठिदपाणिपल्लवा ईस संचरणबंधुरा भव।
जं चिराअ कलहंसमंडली भोदु केलिगमणम्मि दुब्भगा ॥२३॥

(मम हस्तस्थितपाणिपल्लवा ईषत्सञ्चरणबन्धुरा भव।
यच्चिराय कलहंसमण्डली भवतु केलिगमने दुर्भगा॥ २३ ॥)

अन्वयः—मम हस्तस्थितपाणिपल्लवा ईषत्सञ्चरणबन्धुरा भव। यत् कलहंसमण्डली चिराय केलिगमने दुर्भगा भवतु।

सरलार्थः—मया तव करकिसलय' गृहीतोऽस्ति, त्वम् मन्दं मन्दं चलनाय

रहा है; वस्त्र के छोर से इसकी हवा कर दूँ (हवा करते हुए) अरे ! अरे ! वस्त्र के छोर की हवा से दीपक बुझ गया। (विचार कर-अपने मन में) चलो सैर करने बाग में चलें। (जोर से) बड़ा अन्धेरा है। सुरंग के दरवाजे से ही बाग की ओर चलें।

(सब निकलने का अभिनय करते हैं)

राजा—**(कर्पूरमञ्जरी का हाथ पकड़ कर):—**

मैंनें अपने हाथ से तेरा कोमल हाथ पकड़ लिया है, तू धीरे २ चलने के लिये

सा स्वेदसलिलसिक्तगात्रा=पसीने से भीगे शरीर वाली। सिचयाञ्चलेन=वस्त्र के छोर से। वीजयिष्यामि=हवा करूंगा। निर्वाणः=बुझ गया, निर् √वा+त=निर्वाण—क्तप्रत्यय-त को न आदेश (निर्वाणोऽवाते)। अन्धकारनृत्यम्=अत्यन्त अंधेरा। सुरङ्गामुखेन=सुरंग के रास्ते से।

टिप्पणी—पाणिरेव पल्लवः=पाणिपल्लवः, हस्ते स्थितः पाणिपल्लवः यस्याः सा हस्त-

[स्पर्शसुखमभिनीय]

जे णवस्स तिउसस्स कंटआ जे कदंबमउलस्स केसरा ।
अज्ज तुज्झ करफंससंगिहिं ते हुअंति मह अंगहिं णिज्जिदा ॥

(ये नवस्य त्रपुषस्य[1] कण्टका ये कदम्बमुकुलस्य केसरा[2]:
अद्य तव करस्पर्शसङ्गिभिस्ते भवन्ति ममाङ्गैर्निर्जिता: ॥२४॥)

[नेपथ्ये]

वैतालिक:—**सुहणिबंधणो होदु देवस्स चंदुज्जोओ ।**
(सुख[3]निबन्धनो भवतु देवस्य चन्द्रोद्द्योत[4]:)—

प्रयासं कुरु। तव मन्दगतिरेतादृशी भवेत् यत्तां दृष्ट्वा कलहंसानामपि मन्दगतिं जना नाद्रियेरन् ॥ २३ ॥

अन्वय:—ये नवस्य त्रपुषस्य कण्टका:, ये कदम्बमुकुलस्य केसरा:, ते अद्य तव करस्पर्शसंगिभि: मम अंगै: निर्जिता भवन्ति ।

सरलार्थ:—ये नवस्य त्रपुषाख्यफलविशेषस्य कण्टका:, ये च कदम्बमुकुलस्य किञ्जल्का: भवन्ति, ते अद्य तव करस्पर्शं लब्ध्वा सञ्जातरोमाञ्चै: मम अङ्गै: निर्जिता: सन्ति, तव करस्पर्शेन मम अतीव रोमहर्षो जात इति भाव: ॥ २४ ॥

प्रयत्न कर, ताकि हंसों की चाल भी तेरी चाल के समान अप्रिय हो जाय ॥ २३ ॥

(स्पर्शजनित सुख का अभिनय कर')

त्रपुष नाम के फल में जो कांटे होते हैं, अथवा कदम्ब के फूल में जो केसर होती हैं, ये सब तेरे हाथ का स्पर्श पाकर उत्पन्न हुये रोमाञ्च वाले मेरे अंगों के सामने कुछ भी नहीं हैं ॥ २४ ॥

(नेपथ्य में)

वैतालिक—**महाराज के लिये चन्द्रोदय सुखकर हो ।**

स्थितपाणिपल्लवा = करनिहितकरकिसलया । ईषत्सचरणाय बन्धुरा = ईषत्सचरणबन्धुरा = मन्दं मन्द चलनाय उत्थापितगात्रा । केलिगमने = मस्त चाल । दुर्भगा = अप्रिय ॥ २३ ॥

१. त्रपुस = एक फूल का नाम ।   २. केसर. = किञ्जल्क ।

३ सुखस्य निबन्धन: = सुखनिबन्धन: = सुखहेतु. । ४ चन्द्रोद्योत: = चन्द्रमाका प्रकाश ।

भूगोले तिमिराणुबंधमलिणे भूमीरुहेव्व द्विदे
संजादा णवभुज्जपिंजरमुही जोण्हाअ पुव्वा दिसा ।
मुंचतो मुचुकुंदकेसरसिरीसोहाणुआरे करे,
चंदो प्पेक्ख कलक्कमेण अ गदो सम्पुण्णबिंबत्तणं ॥२५॥

(भूगोले तिमिरानुबन्धमलिने भूमिरुह इव स्थिते
सञ्जाता नवभूर्जपिञ्जरमुखी ज्योत्स्नया पूर्वा दिशा ।
मुञ्चन्मुचुकुन्दकेसरश्रीशोभानुकारान् करान्
चन्द्रः पश्य कलाक्रमेण च गतः सम्पूर्णविम्बत्वम् ॥ २५ ॥)

अन्वयः—तिमिरानुबन्धमलिने भूगोले भूमिरुहे इव स्थिते पूर्वा दिशा ज्योत्स्नया नवभूर्जपिञ्जरमुखी सञ्जाता। मुचुकुन्दकेसरश्रीशोभानुकारान् करान् मुञ्चन् चन्द्रः कलाक्रमेण सम्पूर्णविम्बत्वम् गतः, पश्य ।

व्याख्या—तिमिराणामन्धकाराणामनुबन्धेन सततसञ्चारेण भूगोले भूमण्डले भूमिरुहे वृक्ष इव स्थिते नीलीभूते सति पूर्वा दिशा ज्योत्स्नया चन्द्रिकया नवभूर्जपत्रमिव पिंगलमुखी कपिशवर्णा सञ्जाता। मुचुकुन्दाख्यस्य कुसुमस्य ये केसराः किञ्जल्काः तेषां या श्रीः तत्सदृशी शोभां धारयतः किरणान् मुञ्चन् अभिक्षिपन् चन्द्रः कलाक्रमेण सम्पूर्णमण्डलत्वं गतः प्राप्तः। शनैः शनैः चन्द्रः पूर्णतामुपगतः। त्वं तम् पश्येति भावः ॥ २५ ॥

अन्धकार के लगातार बढ़ने से भूमण्डल के मलिन और वृक्ष की तरह नीले मालूम पड़ने पर पूर्व दिशा चांदनी से नए भोजपत्र के समान पीली हो गई है। मुचुकुन्द फूल की केसर की शोभा के समान शोभा वाली किरणों को बरसाता हुआ चन्द्रमा, देखो किस तरह धीरे २ अपनी कलाओं से पूर्ण हो गया है ॥ २५ ॥

टिप्पणी—तिमिरस्य अनुबन्धेन मलिने = तिमिरानुबन्धमलिने = अन्धकारस्य सततसचारेणावृते। भूमिरुहः = वृक्ष। नवभूर्जस्य इव पिंजर मुखम् यस्याः सा नवभूर्जपिंजरमुखी = नवभूर्जपत्रपिंगलवर्णा। मुचुकुन्दस्य केसराः मुचुकुन्दकेसराः तेषां या श्रीः तस्याः शोभाम् अनुकुर्वन्ति-तान् = मुचुकुन्दकेसरश्रीशोभानुकारान् = मुचुकुन्दकिञ्जल्कसमृद्धिशोभायुक्तान्। मुचुकुन्द = एक प्रकार का फूल। मुञ्चन् = छोड़ता हुआ- √मुच् + अत् =

अवि अ (अपि च)—

अकुंकुममचंदणं दहदिहावहूमंडणं
अकंकणमकुंडलं भुअणमंडलीभूसणं ।
असोसणममोहणं मअरलंछणस्साउहं
मिअककिरणावली णहतलम्मि पुंजिज्जइ ॥ २६ ॥

(अकुङ्कुममचन्दनं दशदिशावधूमण्डनं
अकङ्कणमकुण्डलं भुवनमण्डलीभूषणम् ।
अशोषणममोहनं मकरलाञ्छनस्यायुधं
मृगाङ्ककिरणावली नभस्तले पुञ्जीभवति ॥ २६ ॥)

सरलार्थः—अन्धकारस्य बाहुल्येन भूमण्डलं नीलीभूतमासीत्, चन्द्रिकया प्राची दिशा सपदि एव भूर्जपत्रमिव उज्ज्वलाऽभवत्। चन्द्र· अभित· स्वकिरणान् वर्षति, शनै· शनैः कलाना वृद्धया पूर्णश्च सञ्जात इति त्वं चन्द्रं पश्येति भाव· ॥२५॥

अन्वयः—अकुङ्कुमम् अचन्दनम् दशदिशावधूमण्डनम् अकङ्कणम् अकुण्डलम् भुवनमण्डलीभूषणम् अशोषणम् अमोहनम् मकरलाञ्छनस्य आयुधम् मृगाङ्ककिरणावली नभस्तले पुञ्जीभवति ॥

सरलार्थः—कुङ्कुमरहितम्, चन्दनविहीनम्, दशानां दिगङ्गनानाम् आभूषणम्, कङ्कणरहितम्, कुण्डलवर्जितम्, संसारस्य अलङ्करणम्, अशोषणम्, मोहस्य अजनकम्, कामदेवस्यास्त्रभूतम् च इयं चन्द्ररश्मिमाला आकाशे राशीभवति ॥२६॥

और भीः—

कुङ्कुम से रहित, चन्दनविहीन, दशों दिशाओं को सजाने वाली, कङ्कणरहित, विना कुण्डल की, संसार की शोभा, लोगों को तृप्त करने वाली तथा मोह न करने वाली और कामदेव की अस्त्रभूत ये चन्द्ररश्मियाँ आकाश में इकट्ठी हो रही हैं ॥

शत्रन्त। सम्पूर्णः बिम्बः यस्य स सम्पूर्णबिम्बः, तस्य भावस्तम् = सम्पूर्णबिम्बत्वम् = सपूर्णमण्डलत्वम्। कलाक्रमेण = कलाओं के क्रम से ॥ २५ ॥

टिप्पणी—नास्ति कुङ्कुम गन्धद्रव्यविशेषः यस्मिन् तत् = अकुङ्कुमम् = कुङ्कुमरहितम्। दशानां दिशावधूनां मण्डनम् = दशदिशावधूमण्डनम् = दशदिगङ्गनाभूषणम्। भुवनमण्डल्याः

विदूषकः—भो ! कणअचंडेण वण्णिदा चंदुज्जो अलच्छी; ता संपदं माणिक्कचंडस्सावसरो । (भोः ! कनकचण्डेन वर्णिता चन्द्रोद्योतलक्ष्मीः; तत् साम्प्रतं माणिक्यचण्डस्यावसरः ।)

[नेपथ्ये]

द्वितीयो वैतालिकः—

दज्झंतागुरुधूपवट्टिकलिआ दीअंतदीओज्जला
लंबिज्जंतविचित्तमोत्तिअलदा मुंचतपारावदा ।
सज्जिज्जंतमणोज्जकेलिसअणा जप्पंतदूईसआ
सज्जुच्छंगवलंतमाणिणिजणा वट्टंति लीलाघरा ॥२७॥

(दह्यमानागुरुधूपवर्त्तिकलिका दीयमानदीपोज्ज्वला
लम्ब्यमानविचित्रमौक्तिकलता मुच्यमानपारावताः ।

अन्वयः—लीलागृहाः दह्यमानागुरुधूपवर्तिकलिकाः दीपमानदीपोज्ज्वलाः लम्ब्यमानविचित्रमौक्तिकलताः मुच्यमानपारावताः सज्जीक्रियमाणमनोज्ञकेलिशयनाः जल्पद्दूतीशताः शय्योत्संगवलन्मानिनीजनाः वर्तन्ते ॥ २७ ॥

सरलार्थः—क्रीडामन्दिरेषु अगुरुधूपानां वर्तयः कलिकारूपेण सौगन्ध्यसञ्चारार्थम् दह्यमानाः सन्ति, क्रीडामन्दिराणि प्रज्वाल्यमानैः दीपैः प्रकाशितानि सन्ति,

---

विदूषक—**कनकचण्ड ने चांदनी का वर्णन कर दिया, अब माणिक्यचण्ड की बारी है ।**

(नेपथ्य में)

द्वितीय वैतालिक—**लीलागृहों में अगरधूप की बत्तियाँ कलियों की तरह जल रही हैं, दीप्यमान दीपकों से लीलागृहों में प्रकाश हो रहा है, सुन्दर मौक्तिक-**

भूषणम् = भुवनमण्डलीभूषणम् = जगतीतलालङ्करणम् । मकरः अस्ति लाञ्छनं यस्य स तस्य मकरलाञ्छनस्य = कामदेवस्य । मृगाकस्य किरणानाम् आवली = मृगाङ्ककिरणावली = चन्द्ररश्मिनिचयः । पुञ्जीभवति = सञ्चीयते (च्विप्रत्ययान्त) ॥ २६ ॥

टिप्पणी—कनकचण्डः = प्रथम वैतालिक का नाम । चन्द्रोद्योतलक्ष्मीः = चन्द्रमा के प्रकाश की शोभा । माणिक्यचण्डः = द्वितीय वैतालिक का नाम ।

टिप्पणी—अगुरुधूपानाम् वर्तयः = अगुरुधूपवर्तयः । दह्यमानाः अगुरुधूपवर्तयः एव

सज्जीक्रियमाणमनोज्ञकेलिशयना जल्पद्दूतीशताः
शय्योत्सङ्गवलन्मानिनीजना वर्त्तन्ते लीलागृहाः ॥ २७ ॥)

अवि अ (अपि च)—

दें ता कप्पूरपूरच्छुरणमिव दिसासुंदरीणं मुहेसु
स्लक्खं जोण्हं किरंतो भुअणजणमणोणंदणं चंदणं व्व ।
जिण्णं कंदप्पकंदं त्तिहुअणकलणाकंदलिल्लं कुणंतो
जादा एणंकपादा सअलजलहरोम्मुक्कधाराणुआरा ॥२८॥

तेषु रम्याः मौक्तिकलताः शोभार्थम् लम्ब्यमानाः दृश्यन्ते, पारावताश्च स्वावासात् मुच्यमानाः सन्ति, क्रीडामन्दिरेषु मनोहराणि पर्यंकानि पुष्परचनादिभिः सज्जीकृतानि सन्ति, दूतीनां समूहाश्च इतस्ततः जल्पन्तः वर्तन्ते, मानिनीजनश्च लीलागृहेषु शय्यायाः अन्तिके तिष्ठन्नास्ते ॥ २७ ॥

लताएँ सजावट के लिए लटकी हुई हैं, अपने स्थानों से कबूतर छोड़ दिए गए हैं, सुन्दर शय्याएँ सजा दी गई हैं, सैकड़ों दूतियाँ इधर उधर बात कर रही हैं, मानिनी स्त्रियाँ शय्याओं के पास बैठी हुई हैं ॥ २७ ॥

और भी:—

जल से भरे हुये मेघों से उन्मुक्त धाराओं जैसी चन्द्रमा की किरणें दिशारूपी

कालिका. येषु ते दह्यमानागुरुधूपवर्तिकलिका =जलती हुई अगुरुधूप की बत्तियाँ ही हैं कलियाँ जिन में। दायमानैः दीपैः उज्ज्वला. =दीयमानदीपोज्ज्वला. =प्रज्वाल्यमानदीपप्रकाशिता.। लम्ब्यमानाः विचित्राः मौक्तिकलताः येषु ते लम्ब्यमानविचित्रमौक्तिकलता = आन्दोल्यमानरमणीयमुक्ताप्रलम्बाः। सजावट के लिए लटकायी गयीं हैं मोतियों की लड़े जिन में। मुच्यमानाः पारावता येषु ते मुच्यमानपारावताः=अपने आवास से छोड़ दिए गए हैं कबूतर जहाँ पर (सुरत क्रीडाओं के उद्दीपक होने के कारण)। सज्जीक्रियमाणानि मनोज्ञानि केलिशयनानि येषु ते सज्जीक्रियमाणमनोज्ञकेलिशयनाः= मनोहरपर्यंकयुक्ताः। जल्पन्ति दूतीना शतानि येषु ते जल्पद्दूतीशताः=सैकड़ों दूतियाँ जहाँ पर बातचीत कर रही हैं। शय्यायाः उत्सङ्गे वलन् मानिनीजनः येषु ते शय्योत्सङ्गवलन्मानिनीजनाः=पर्यंकप्रान्ततिष्ठन्मानिनीजना.। शय्या के पास बैठी हैं मानिनी स्त्रियाँ जहाँ पर। लीलागृहाः=क्रीडामन्दिराणि। विश्राम करने के कमरे। ऊपर आए हुए सब पद 'लीलागृहा.' के विशेषण हैं ॥ २७ ॥

(ददतः कर्पूरपूरच्छुरणमिव दिशासुन्दरीणां मुखेषु
श्लक्ष्णां ज्योत्स्नां किरन्तो भुवनजनमनोनन्दनं चन्दनमिव ।
जीर्णं कन्दर्पकन्दं त्रिभुवनकलनाकन्दलितं कुर्वन्तो
जाता एणाङ्कपादाः सजलजलधरोन्मुक्तधारानुकाराः ॥ २८ ॥)

विदूषकः—**दिसबहुत्तंसो णहसरहंसो ।**
णिहुवणकंदो प्पसरइ चंदो ॥ २९ ॥

अन्वयः—सजलजलधरोन्मुक्तधारानुकारा एणाङ्कपादा· दिशासुन्दरीणाम् मुखेषु कर्पूरपूरच्छुरणमिव ददत·, भुवनजनमनोनन्दनं चन्दनमिव श्लक्ष्णां ज्योत्स्नाम् किरन्त, जीर्णम् कन्दर्पकन्दम् त्रिभुवनकलनाकन्दलितम् कुर्वन्तः जाताः ।

व्याख्या—जलेन सहिता· सजला·, सजलजलधरैः मेघै· उन्मुक्तानां धाराणां सदृशा चन्द्रकिरणा दिगङ्गनानाम् मुखेषु कर्पूरचूर्णस्य लेपनं कुर्वन्त इव दृश्यन्ते सर्वा· दिशः साम्प्रतम् धवला सञ्जाता· । चन्द्रकिरणाः सर्वस्य लोकस्य मनसः आह्लादकम् चन्दनमिव चिक्कणां चन्द्रिकां किरन्ति (वर्षन्ति)। जीर्णम् तिरस्कृतं नातिप्रवृद्धम् काम त्रिभुवनस्य व्यापनेन कन्दलितं कुर्वन्तः वर्धयन्त चन्द्ररश्मयः दृश्यन्ते ॥ २८ ॥

सुन्दरियों के मुख पर कपूर के चूर्ण का लेप सा देती हुई दिखाई देती हैं, (अर्थात् सारी दिशाएँ कपूर की तरह उज्ज्वल हो रही हैं)। सारे संसार के मन को प्रसन्न करने वाले चन्दन की तरह स्वच्छ और चिक्कण चांदनी फैला रही हैं, शान्त काम· देव को तीनों लोकों में फैला कर ये चन्द्र किरणें काम का उद्दीपन कर रही हैं॥२८॥

विदूषक—**दिशारूपी स्त्रियों का आभूषण, आकाशरूपी सरोवर में हंस की तरह**

टिप्पणी—जलेन सहिता· सजला·, सजलाश्च ये जलधराः, सजलजलधराः, तैः उन्मुक्ता· या· धाराः ताः अनुकुर्वन्ति, ते सजलजलधरोन्मुक्तधारानुकाराः = सजलमेघाभिवृष्टधारा- सदृशा –जल से भरे हुए मेघों से उन्मुक्त धारा की तरह । एणाङ्कस्य मृगाङ्कस्य पादा· = एणाङ्कपादा· = चन्द्ररश्मयः । कर्पूरस्य पूरैः छुरणम् = कर्पूरचूर्णलेपनम् । ददत· = देती हुई- √दा + अत् शत्रन्त । श्लक्ष्ण = चिकना । किरन्तः = वर्षन्तः- √कृ + अ + अत्-शत्रन्त । त्रिभुवनस्य कलनया कन्दलितम् = त्रिभुवनकलनाकन्दलितम्-त्रिभुवनव्यापनेन प्रवृद्धम् । जीर्णम् = तिरस्कृतम्, नष्टप्रभावम् ॥ २८ ॥

(दिग्वधूत्तंसो नभःसरोहंसः ।
निधुवनकन्दः प्रसरति चन्द्रः ॥ २९ ॥)

कुरङ्गिका—

ससहररइदगव्वो माणिणिमाणघरट्टो ।
णवचंपश्रकोदंडो मश्रणो जअइ प्पश्रंडो ॥ ३० ॥
(शशधररचितगर्वो मानिनीमानघरट्टः ।
नवचम्पककोदण्डो मदनो जयति प्रचण्डः ॥ ३० ॥)

[कर्पूरमञ्जरीं प्रति]—प्पिअसहि ! तुए किदं चंदवण्णणं महाराअस्स पुरदो पढिस्सं । (प्रियसखि ! त्वया कृतं चन्द्रवर्णनं महाराजस्य पुरतः पठिष्यामि ।)

सरलार्थः—दिगङ्गनानाम् आभूषणम्, नभ-सरसि हंस इव दृश्यमान सुरतस्य उद्दीपक चन्द्र• उदयते ॥ २९ ॥

सरलार्थः—चन्द्रेण यस्य गर्व उत्पादितोऽस्ति, यश्च मानिनीनां मानं मर्दयति, नवचम्पकपुष्पमेव च यस्य धनुरस्ति स उद्धत मदनः जयति सर्वोत्कर्षेण विराजते ॥

विहार करने वाला तथा शृङ्गार रस का उद्दीपक यह चन्द्रमा उदय हो रहा है ॥२९॥

कुरङ्गिका—चन्द्रमा ने जिसको गर्वीला बना दिया है, जो मानिनी स्त्रियों के मान को चूर करने वाला है तथा चम्पा का नया फूल ही जिसका धनुष है ऐसा कामदेव बड़ी प्रचण्डता से संसार को जीत रहा है ॥ ३० ॥

(कर्पूरमञ्जरी से) प्रियसखि ! तुम्हारे द्वारा किया हुआ चन्द्रवर्णन महाराज के सामने पढूंगी ।

टिप्पणी—दिगेव वधूः = दिग्वधूः, तस्या. उत्तंसः = दिग्वधूत्तसः = दिगङ्गनाकर्णभूषणम् । नभ एव सरः, तस्य हंसः = नभ.सरोहस. = आकाशहंस.-आकाशरूपी सरोवर मे हस के समान । निधुवनस्य कन्दः = निधुवनकन्दः = सम्भोगोद्दीपकः । प्रसरति = उदयति, उदय होता है ॥ २९ ॥

टिप्पणी—शशधरेण रचितः गर्वः यस्य सः शशधररचितगर्वः = चन्द्रोत्पादिताभिमानः । मानिनीना मानस्य घरट्टः = मानिनीमानघरट्ट = मानवती स्त्रियों के मान को

[कर्पूरमञ्जरी लज्जते । कुरङ्गिका पठति]

मंडले ससहरस्स गोरए दंतपंजरबिलासचोरए ।
भादि लंछणमिओ फुरंतओ केलिकोइलतुलं धरंतओ ॥ ३१ ॥

(मण्डले शशधरस्य गौरे दन्तपञ्जरविलासचौरे ।
भाति लाञ्छनमृगः स्फुरन् केलिकोकिलतुलां धारयन् ॥३१॥)

राजा—अहो ! कप्पूरमंजरीए अहिणवत्थदंसणं, रमणीओ सद्दो, उत्तिविचित्तदा, रसणिस्संदो अ । (अहो ! कर्पूरमञ्जर्या अभिनवार्थदर्शनं, रमणीयः शब्दः, उक्तिविचित्रता, रसनिष्यन्दश्च ।)

[तां प्रति]

मा कहिं पि बअणेण बिब्भमो होउ इत्ति तुह णूणमिंदुणा ।
लंछणच्छलमसीबिसेसओ प्पेक्ख बिम्बफलए णिए किदो ॥३२॥

अन्वयः—गौरे दन्तपञ्जरविलासचौरे शशधरस्य मण्डले स्फुरन् लाञ्छन-मृगः केलिकोकिलतुलां धारयन् भाति ।

सरलार्थः—गौरवर्णे हस्तिदन्तनिर्मितात्पञ्जरादपि उत्कृष्टे चन्द्रमसः मण्डले स्फुरन् अयं कलङ्करूपो मृग क्रीडापिक इव शोभते ॥ ३१ ॥

(कर्पूरमञ्जरी शर्माती है । कुरङ्गिका पढ़ती है ।):—

उज्ज्वल तथा हाथीदांत के बने पिंजड़े से भी अधिक सुन्दर चन्द्रमा के मण्डल में घूमता हुआ यह कलङ्क मृग कोयल के खिलौने की तरह शोभायमान है ॥ ३१ ॥

राजा—**आश्चर्य है, कर्पूरमञ्जरी ने नई बात कही है, शब्द भी सुन्दर हैं, उक्ति भी विचित्र है, रस भी खूब छलकता है । (कर्पूरमञ्जरी से)—**

तेरे मुख को देख कर लोग चन्द्रमा न समझ बैठें इसलिये निश्चय ही चन्द्रमा

